3.1.1

संस्थाया अनुसन्धान योजनाः मुहु र्मुहुः नवीनी कृताः। एवमेव अनुसन्धानस्य प्रोमत्यै सुचारूनिर्दि”टा योजनाः संस्थायाः जालस्थाने उचारोपिता क्रियानिव्ताच।

**प्रस्तावना–**

– भारतीय संस्कृतेः राजधान्यां काश्यां स्थितेन सम्पूर्णानन्द संस्कृत विश्वविद्यालयेन उत्कृष्टतम मनुसन्धान कर्म क्रियते। अत एव उच्चतममानकेषु अनुसन्धानं संचालयितुं शोधनीति पत्रमिदं सर्वविधोत्कृष्टतम शोधप्रबन्धानां विषये मार्गदर्शनं प्रकरोति।

– शोधनीति पत्रस्य उद्देश्यं विश्वव्यापि मानकानुसारं विशिष्टानुसन्धान समूहानां संघटनं विधाय अनुकूलानुसन्धान संस्कृतेः पारिस्थितिकी तन्त्रस्य च स्थापनं वर्तते।

– शोधनीति प्रपत्र मिदं वैश्विक समाजस्य अध्ययनहिताय शोधनिष्कषान् प्रयोक्तुं प्राथमिकतां प्रददाति।

– इदं शोधनीति पत्रं शैक्षिणिक मानकानां नैतिकातायाश्च पालयित्रीं शोधसंस्कृतिं प्रारभते। तत्संवर्धनञ्च क्रियते।

– अस्य प्रपत्रस्य उद्देश्यं विस्तृतानुसन्धान गति विधीनां संवर्धनं शोध सम्बद्ध कार्यमीतेः प्रदानमस्ति।

– प्रपत्रमिदं सैद्धान्तिकज्ञानस्य परिणामेषु क्रियान्वयनं विधातु मवसरं प्रपच्छति अपि च प्रपत्रसिद्धान्तानामनुप्रयोगाधारेण अनुसन्धानार्थं मार्ग प्रदर्शयति।

**शोधनीति पत्रस्य समुद्देश्यानि–**

– व्यूहात्मक प्राविधिक परिचालात्मकस्तरेषु सर्वेषां विश्वविद्यालयानुसन्धानगतिविधीनां योजनार्थं आयव्ययार्थ नियन्त्रणार्थञ्च संस्थागतक्षमतानां संवर्धनम्।

– विश्वविद्यालयस्यास्य तत्तत्संकाय सदस्यानां छात्राणाञ्च शोध परियोजनाषु उपक्रमेषु साहा्यार्थं जौविध्य प्रदानार्थञ्च पर्याप्त शोधनिधेः स्थापनं प्रबन्धनञ्च।

– शोधार्थ धनवितरणे पुरस्कार स्थापने इतरेषु सर्वेषु च कार्येषु साहा‌य्यार्थं नीतिनां विधीनां मानाकनाञ्च निर्माणम्।

– स्वीकीयोद्देश्यैः सूक्ष्मायनदृष्ट्या च सह राष्टीयान्ताराष्ट्रीय विकासलक्ष्यानुरूपं विधातुं विश्वविद्यालये सर्वविध शोधप्रयासानां सम्यक्तया समन्वयार्थं व्यवस्थाया आदानप्रदानञ्च।

– अस्य संस्थायाः शोधकार्य सूचीं तत्स्थिरीयकरणार्थञ्च प्रमुखसमुचितक्षेत्रेभ्यो वित्तपोषित शोधपरियोजनाभ्यश्च सर्वोच्च प्राथमिकतायाः रूपरेखा निर्माणम्।

**शोधस्य व्यापकक्षेमानि–**

1– **शोधप्रकाशनानि–**

(अ) विश्वविद्यालयोऽयं परम्पराणां शास्त्राण्मम् अन्य सम्बद्ध विषयाणाञ्च क्षेत्रे गुणवत्तापूर्णपचिकाणां सरस्वसुषमादि पत्रिकायां शास्त्रीय ग्रन्थानाञ्च मुद्रणं प्रकाशनञ्च विश्वविद्यालये स्थितः प्रकाशन विभागः संवर्धनं करोति करिष्यति च।

(ब) प्राचीनतमोऽयं विश्वविद्यालयः प्रसिद्धानां विदुषां प्रणेतृणाञ्च दुर्लभ प्रकाशनानां पुनः प्रकाशनेऽपि आर्थिकं साहाय्यं प्रदादाति दास्यति च।

(स) विश्वविद्यालयः उच्चानुक्रमितगुणवत्ता पूर्ण शोधपत्रानि प्रकाशयितुं विश्वविद्यालयीयानां प्राध्यापकानां छात्राणाञ्च प्रोत्साहनं विधास्यन्ति।

**2– शोधपरियोजनाः–**

मूलधनसम्बद्ध प्रावधानानि राष्ट्रीयान्ताराष्ट्र्यमहत्वस्य महत्वपूर्णक्षेत्रेषु प्रतिस्पर्धि शोध परियोजनायाः प्रोत्साहनं विधास्यन्ति। मूलधनस्यानुदानेन नवीन विचाराणां ज्ञानस्य च संवर्धनं भविष्यति, अपि च शोधपरियोजना सञ्चाणने सौविधां भविष्यति, याः बाह्यानुदान माध्यमेन स्वीयस्रोतांसि सम्भावित रूपेण विकासयिष्यन्ति।

**3– बौद्धिकसम्पदाधिकारः–**

– प्रथममिदंभारतसर्वकारेण स्वीकृतस्य व्यापक विषयस्य “ **सर्वनात्मक भारतं नवाचार भारतं** ” इत्यानुसारं विश्वविद्यालये गतिशीनां सजीवां सन्तुलित बौद्धिकमधिकारप्रणालीं प्रोत्साहयति।

– नीतिपत्रमिदं रचनात्कतां नवाचारान् उद्यमितां सामाजिकसांस्कृतिकार्थिकविकासञ्च संवर्धयिष्यन्ति। अपि च संस्कृत ज्ञानं परम्परायाः इतरक्षेत्रे योगायुर्वेद स्वास्थ्य सतत् विकासेषु महत्वपूर्ण सामाजिकार्थिम प्राविधिक विकास क्षेत्रेषु च उभयनार्थम् अधिकभावधानं करिष्यति।

**4– पाण्डुलियीनां भण्डारः–**

– सौभाग्यात् अस्माकं विश्वविद्यालये पाण्डुलिपीनां महनीयं संग्रहः विश्वप्रसिद्धे सरस्वती भवने विद्यते। अत्र लक्षाधिकाः पाण्डुलिपीय स्वर्णादि अक्षरेषु यथा कर्गले 293500, ताम्पत्रे 1650, काष्ठपत्रे 29 , वस्त्रे 07, भूर्जपत्रे 03 स्वर्ण पत्रे 7 लिखिताः सन्ति। सहस्रन्धिकवर्षाणि प्राक श्रीमद्भागवतमहापुराणम् , श्रीमद् भागवद्गीता, रासपंचाध्यायी, इत्यादि विविधाः पाण्डुलिपयः संरक्षिता वर्तन्ते। एतदर्थ सर्वकारैः, पर्याप्तः आर्थिक सहयोगाऽपेक्षिता वर्तते। अन्यथा दुर्लभाः पाण्डुलिपयः नष्टा भविष्यन्ति। विश्वविद्यालयः स्वीयसातेसः तथा संस्कृत संवर्धनप्रतिष्ठानेन एन0एम0एम0 द्वारा अल्पीयान् सहयोगोऽधिगतः। यतः संस्कृत संवधन प्रतिष्ठाने 1517 संख्याआ, पाण्डुलिपिय संरक्षिता कृताः। शेषाः पाण्डुलिपयः संरक्षनार्थः सर्वकारैः प्रार्थ्यन्ते। पाण्डुलिपिय भाण्डार स्थानं सरस्वती भवनमपि पुनः जीर्णोद्धारा प्रतीक्षते।

**5– विविधकार्यक्रमेषु अनुसन्धानम्–**

– प्राचीनतमोऽयं विश्वविद्यालयोः विविधस्तरेषु स्नातक स्नातकोत्तर विद्यावारित्युध्युत्तरेषु विश्वविद्यालय द्वारा क्रियमान विविधेषु कार्यक्रमेषु गुणवत्तापूर्णमनुसन्धानं संबंधनीय कटिबद्धोऽस्ति।

– शोधकार्ये गुणवत्तापूर्णं कर्तुं विश्वविद्यालयस्य सकाशे उपरि निर्दिष्ट कार्यक्रमाणां कृते विस्तृता मार्गदर्शिका भविष्यति।

– विश्वविद्यालयस्य शोधनीयभिलेखानां सज्जीकरणम्।

– विदुषां समवायेन प्रदत्तस्य शोधक्षेत्रस्य सज्जीकरणम्, यत्र बृहतीनां ध्वीनां परियोजनानां परामर्शस्य अथवा अन्यशोध गतिविधीनां समावेशो भविता।

– शोध प्रस्तावनां पुनरीक्षणं शोधशीर्षकस्य यथा स्वीकृतिः।

– स्वकीय क्षेमाधिकारे शोधस्य प्रमुखक्षेत्राणां निर्धारणम्।

– विश्वप्रसिद्धेन विश्वविद्यायने राष्ट्रीयैः।

– अन्तराष्ट्रीयाभिकरर्वा वित्त पोषनाय विश्वविद्यालयीयमनुसन्धान कार्यक्रमाणां मूल्यांकनम्।

**शोधनीतेः क्रियान्वयनतन्मम्–**

– विश्वविद्यालयस्य अनुसन्धान समितिः विविधस्तरेषु अन्य समितिभिश्च संयुज्य कार्यकृत्वा अस्या शोधनीतेः अभिलेखस्य क्रियान्वयने दायित्वभाग भविष्यति। अनुसन्धान विभागस्य निदेशकः समस्त संकाय प्रमुखैः सहभिलित्वाऽस्य अभिलेखस्य क्रियान्वय निर्धारणं करिष्यति। अनुसन्धान विभाग द्वारा अनुसन्धानाय सौविध्यप्रदानं प्रारम्भिकधनप्रदानाय एकस्य अनुसन्धान वित्त पोषस्य स्थापना च संस्थायाऽनया करणीया वर्तते।

Registrar
Sampurnanand Sanskrit University
Varanasi